श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १०

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 2 वर्षः - 2015-16

प्रधानसम्पादकः
प्रो. अर्कनाथचौधरी

सम्पादकौ
डॉ. पङ्कजकुमारः रावलः
डॉ. शत्रुघ्नपाणिग्राही

श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्

Scanned by CamScanner

प्रकाशकः -

प्रो. महेन्द्रकुमारः दवे
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2018*

प्रथमं संस्करणम् - मई - २०१८

प्रतयः - ३५०

ISBN - 978-93-83097-27-2

मूल्यम् - रु. २०० /-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Scanned by CamScanner

# मन्त्रार्थविचारः

डॉ.शत्रुघ्नपाणिग्राही,
वेदवेदाङ्गसङ्कायाध्यक्षः,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम् ।

**प्रस्तावना**

वेदः भवति अस्माकं ज्ञानदीपः । भगवतः परब्रह्मणः निःश्वासभूतोऽयं वेदः नित्यः शाश्वतः त्रिकालाबाध्यः अपौरुषेयश्च । वैदिकमन्त्राणामनुशीलनेन अनेकाः शङ्काः मनसि आगच्छन्ति । मन्त्रभागे यत्र यत्र दृष्टिर्निक्षिप्यते तत्र तत्र विस्मयः समुपलभ्यते । वाक्यत्वेऽपि तेषां मन्त्राणामपौरुषेयत्वम्, आनन्त्येऽपि सुश्लिष्टत्वम्, आपाततः पौनरुक्त्यबाधादिषु सत्स्वपि स्वतःप्रामाण्यम्, ग्रन्थरूपत्वेऽपि पारमेश्वरनिःश्वासलीलान्यायत्वम्, अनादित्वेऽपि प्राचीनतमत्वेऽपि प्रागैतिहासिकत्वेऽपि यथास्थितानुपूर्वीणां स्वरमात्रादिश्रुतिविपर्ययाभावः । अनन्ताभिश्शाखाभिः समुपबृंहितो महान्तं विस्तारं लम्भितः, पवित्रेऽस्मिन् भारतवर्षे गुरुशिष्यपरम्परया चिरन्तनसमयादध्ययनाध्यापन- घण्टापथमवतारितोऽविच्छेदेन प्रचलति । धर्मस्य मूलं वेदः । एषः मन्त्रब्राह्मणाभ्यां समुपबृंहितः । दार्शनिकेषु मीमांसकधुरीणाः वेदस्य प्रामाण्यस्वतस्त्वमङ्गीकुर्वन्ति । यद्यपि वेदस्य अस्तित्वं सिद्ध्यति तथापि नासौ व्याख्यानमर्हति इति केषाञ्चित् मतम् । यतोहि तेषां मते वेदस्य लक्षणं मन्त्रब्राह्मणात्मकः शब्दराशिः[1] इति कथ्यते चेत् मन्त्राणां ब्राह्मणानाञ्च स्वरूपं वर्गीकरणं च स्पष्टं नास्ति । अप्रमाणत्वेन अनुपयुक्तत्वात् इति आचार्यकौत्सः कथयति । सम्यगनुभवसाधनं प्रमाणम् इति केचित् प्रमाणलक्षणं कथयन्ति । अन्ये च 'अनधिगतार्थगन्तृप्रमाणम्' इति स्वीकुर्वन्ति । वेदे उभयोरपि प्रमाणलक्षणयोः समन्वयो न भवति । यतोहि वेदो मन्त्रब्राह्मणात्मकः । मन्त्रब्राह्मणात्मको हि वेद इति कथ्यते चेत् तत्र मन्त्राः केचित् अबोध्याः अबोधकाश्च । यथा – अभ्यक् सा त इन्द्र ऋष्टिः[2], यादृस्मिन् धायि तमपस्यया विदत्,[3] सृण्येव जर्भरी तुर्फरीतू[4] न हि एतैर्मन्त्रैः कश्चिदप्यर्थोऽवबुध्यते ।

Scanned by CamScanner

आचार्यकौत्सः कथयति – अनर्थका हि मन्त्राः[५] । तस्मात् नास्ति मन्त्रभागस्य प्रामाण्यम्। कौत्सस्य मतम् –

**नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्ति -**

नियतवाचोयुक्तयः- निरूढवाचोयुक्तयः - मन्त्रा अभिधाननियता हि भवन्ति। यथा- अग्न आ याहि वीतये – नियतानुपूर्व्याः। अत्र अग्न आयाहि इति स्थले आयाह्यग्ने इति न भवति। परन्तु लोकेऽर्थवतां शब्दानां पौर्वापर्य्यं दृष्टं भवति। यथा – आहर पात्रम् –पात्रमाहर इति । न तथा मन्त्रेषु भवति । जैमिनीयन्यायमालायां जैमिनिना प्रोक्तम् – वाक्यनियमात्[६] । 'अग्निर्मूर्द्धा दिवः ककुत्'[७] इत्येवमेव वाक्यं पठितव्यमिति मन्त्रनियम उपलभ्यते। अर्थप्रत्यायनं तु मूर्द्धाग्निरित्येवं व्युत्क्रमपाठेऽपि भवत्येव। परन्तु मन्त्रेषु तथा न भवति। अतः अर्थवच्छब्दवैधर्म्यात् अनर्थकाः मन्त्राः।

**अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते –**

उदाहरणम्- उरु प्रथस्वेति[८] प्रथयति। अयमपरो हेतुरानर्थक्ये मन्त्राणाम्। 'अनुष्ठानस्मारकाः मन्त्राः' परन्तु अत्र 'उरु प्रथस्व' इति मन्त्रस्य श्रवणेन स्पष्टं न भवति किं प्रथयति कथं प्रथयति कः प्रथयतीति । अतः ब्राह्मणेन मन्त्राः रूपसम्पन्नाः भवन्ति । नह्यर्थवन्तः सन्तो दासवद्ब्राह्मणेन विधीयेरन्, विहिताश्च । तस्मादनर्थका मन्त्राः । जैमिनीयन्यायमालायां जैमिनिना प्रोक्तम् – "तदर्थशास्त्रात्"[९] । यस्यार्थस्याभिधाने समर्थो मन्त्रः, स एवाभिधेयो यस्य शास्त्रस्य ब्राह्मणवाक्यस्य, तदिदं वाक्यं तदर्थशास्त्रम् । तस्मात् शास्त्राद् अविवक्षितार्थो मन्त्र इत्यवगम्यते।

**अथाप्यनुपपन्नार्था भवन्ति** –उदाहरणं श्रूयते -"ओषधे त्रायस्वैनम्",[१०] "स्वधिते मैनं हिंसीः"[११], "श्रृणोत ग्रावाणः"[१२] । एतेषु अचेतनानां दर्भक्षुरपाषाणानां चेतनवत् सम्बोधनं श्रूयते। जैमिनीयन्यायमालायां जैमिनिना प्रोक्तम् – अचेतनेऽर्थबन्धनात्[१३] । तस्मादनर्थका मन्त्राः।

**अथापि विप्रतिषिद्धार्था भवन्ति –**

उदाहरणम् – एक एव रुद्रोऽवतस्थे न द्वितीयः[१४] । असंख्याताः सहस्राणि ये रुद्रा

Scanned by CamScanner

अधि भूम्याम्[१६] । अशत्रुरिन्द्र जज्ञिषे । शतं सेना अजयत् साकमिन्द्रः[१७] । एतेषु विपरीतार्थबोधकत्वादप्रामाण्यं मन्त्राणाम्।

**अथापि जानन्तं सम्प्रेष्यति –**

उदाहरणम् – अग्नये समिधमानय – अनुब्रूहीति । "अग्नीदग्नीन् विहर"[१८] इति प्रैषमन्त्रः प्रयोगकाले पठ्यते । तच्च अग्निविहरणादिकं आग्नीध्रेण अध्ययनकाले एव स्वकर्त्तव्यत्वेन बुद्धम् । तस्य च बुद्धस्यार्थस्य पुनर्मन्त्रोच्चारणेन शासनमनर्थकम् । जैमिनीयन्यायमालायां जैमिनिना प्रोक्तम् –बुद्धशास्त्रात्[१९] । अतः मन्त्रा अनर्थकाः।

**अथाप्याह – अदितिः सर्वम् इति –**

उदाहरणम् – अदितिर्द्यौरदितिरन्तरिक्षम्[२०] इति मन्त्रः आम्नायते । यदेव द्यौस्तदेव अन्तरिक्षमित्ययमर्थो विप्रतिषिद्धः । तस्मादनर्थका मन्त्राः । अतः जैमिनीयन्यायमालायां जैमिनिना प्रोक्तम् – अर्थविप्रतिषेधात्[२१] ।

**अथापि अविस्पष्टार्था भवन्ति –**

केषाञ्चिन्मन्त्राणामर्थो विज्ञातुं न शक्यते । उदाहरणम् – अभ्यक्, यादृस्मिन्, जारयायि, काणुका इति । यथा जैमिनीयन्यायमालायां जैमिनिना प्रोक्तम् – अविज्ञेयात्[२२]। अतः मन्त्रा अनर्थका इति पूर्वपक्षस्य मतम्।

**सिद्धान्तपक्षः -**

शङ्का अस्ति चेत् तर्हि समाधानम् अप्यस्ति । एतत् समाधानं हि सिद्धान्तः कथ्यते। कौत्समतनिरसनपूर्वकमत्र सिद्धान्त उपस्थाप्यते।

**अर्थवन्तः, शब्दसामान्यात् –**

शब्दसामान्यादिति हेतुः अर्थवन्तो मन्त्रा इति प्रतिज्ञा । समान एव हि शब्दो लोकेषु मन्त्रेषु च । यथा वेदे तथा लोके । वेदात् सर्वं प्रसिध्यतीति वचनेन स्पष्टं भवति, यथा-

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥
युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥

अर्थात् ईश्वरीयज्ञानानुसारेण स्वयमेव गुम्फिताः सर्वे शब्दा ऋगादिभावैः परिणम्य महर्षिणा वेदरचनार्थमप्रयत्नमानानामप्याद्यानां बुद्धिं स्वयमेवा रूढाः प्रादुरभूवन्निति महर्षयो लेभिर इत्यस्यार्थः । वैदिकशब्दात् एव लौकिकशब्दाः गृहीताः । अतः येन प्रकारेण लौकिकाः शब्दाः सार्थका भवन्ति, तेनैव प्रकारेण वैदिका अपि शब्दाः सार्थका भवन्ति, शब्दसामान्यात् ।

**यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति -**

लौकिकेष्वप्येतद् । नियतवाचोयुक्तयः नियतानुपूर्व्या भवन्ति मन्त्राः । लौकिकेष्वपि ह्यर्थवत्सु शब्देषु नियतवाचोयुक्तित्वं नियतानुपूर्व्यत्वञ्च दृष्टमेव । उदाहरणम् यथा – इन्द्राग्नी, पितापुत्रौ । अतः मन्त्राः सार्थकाः ।

**यथो एतद् ब्राह्मणेन रूपसम्पन्ना विधीयन्त इति, उदितानुवादः स भवति –**

उरुप्रथस्व इत्यत्र यज्ञपतिमेव तत् प्रथयति इति अर्थवादेन संबन्धाय ब्राह्मणे विधिः पठ्यते । पुनश्च अध्वर्युः पुरोडाशमुद्दिश्य मन्त्रे 'प्रथस्व' इत्येवमभिधत्ते । तस्मादभिधानात् अध्वर्युकर्तृकं प्रथनम् । यथा लोके यः कुरु इति ब्रूते स कारयत्येव, तथात्रापि यः प्रथस्व इति ब्रूते स प्रथयत्येव । जैमिनिना प्रोक्तम् – अर्थवादो वा । तस्मादुभयमर्थवत् –

मन्त्रश्च ब्राह्मणञ्चेति दौ भागौ तेन मन्त्रतः ।
अन्यद्ब्राह्मणमित्येतद्धवेद्ब्राह्मणलक्षणम् ॥[२३]

**यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयते -**

"ओषधे त्रायस्वैनम्", "स्वधिते मैनं हिंसीः" इत्यादयो मन्त्राः अनुपपन्नार्था

Scanned by CamScanner

स्तुतिपरकाः वा भवन्ति । अत्र ओषधिपदेन ओषध्यादिदेवतोच्यते । तदुक्तं वेदान्तेऽपि – अभिमानिव्यपदेशस्तु। यस्मिन् वपने ओषधिरपि त्रायते तत्र वपनकर्ता त्रायते इति किमु वक्तव्यम्। तथा ग्रावाणोऽपि प्रातरनुवाकं श्रृण्वन्ति किमुत विद्वांसो ब्राह्मणा इत्यामन्त्रणाभिप्रायः। पुनश्च स्वधिते मैनं हिंसीरित्याह हिंसन्निति तत्र ब्रूमः- आम्नायवचनादहिंसा एषा प्रतीयते। इयमहिंसा इयं हिंसा इति आगमादेतत् प्रतीयते। यदुक्तम्- "या वेदविहिता हिंसा न सा हिंसा प्रकीर्तिता"।

**यथो एतद् विप्रतिषिद्धार्था भवन्तीति, लौकिकेष्वप्येतद् -**

अत्र सिद्धान्तः -नैष विप्रतिषिद्धोऽर्थः। "एक एव रुद्रोऽवतस्थे न द्वितीयः। असंख्याताः सहस्राणि ये रुद्रा अधि भूम्याम्। देवता हि महाभाग्ययोगादेकापि सत्येनेकधा भवति, अनेकापि चैकधा [२४]। यत् पुनरेतदुक्तम्- 'अशत्रुरिन्द्र जज्ञिषे। शतं सेना अजयत् साकमिन्द्रः'। अत्र ब्रूमः - लौकिकेष्वपि अर्थवत्सु शब्देषु एतत् दृष्टम् । तद्यथा – 'असपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति'। न हि कश्चिदसपत्नोऽस्ति लोकेऽनमित्रश्च। यथा -

मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः। उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः॥

**यथो एतज्जानन्तं सम्प्रेष्यतीति –**

लौकिकेष्वप्यर्थवत्सु शब्देषु एतदेव स्वभाव्यं दृष्टम्। जानन्तं गुरुम् अभिवादयते स्वगोत्रमभिवदन्। तथा जानते मधुपर्कं प्राह – त्रिर्मधुपर्क्को-मधुपर्क्क इति। [२५]

**यथो एतददितिः सर्वमिति –**

लौकिकेष्वप्येतद्। यथा – सर्वरसा अनुप्राप्ताः पानीयमिति। अदितिर्देवमाता, अत्र ब्रूमः- स एव भक्तिवादः। यथा – 'त्वमेव माता च पिता त्वमेव'। लौकिकेष्वपि शब्देषु एतत् दृष्टम् । वेदे अदितिश्चतुर्धा व्याख्यायते –सूर्यमूला, द्रष्टृमूला, नक्षत्रमूला, आकाशमूला चेति। तद् यथा- समसंमुखयोः पृथ्वीसूर्य्ययोरनवरोधेन संस्थानं अदितिः। अथैतद्विपर्य्यासे सूर्यस्य पृथिव्याऽवरोधेन संस्थानं दितिः । तत्र तस्मिन् पृथ्वीसूर्य्ययोः सांमुख्ये दिवमारभ्य पृथ्वीतलपर्यन्तं ये यथाऽर्था अवस्थितास्तेषामशेषाणां

संमिलितरूपस्येदमदितित्वं विज्ञायते। एतदभिप्रायेणैव मन्त्रश्रुतिः श्रूयते–

"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः"[२६]। अत्र पिता सूर्य्यमूलिका द्यौः पुत्रोऽग्निः।

**यथो एतदविस्पष्टार्था भवन्तीति–**

अत्र ब्रूमः- "नैष स्थाणोरपराधः" इति। न ह्यत्र स्थाणुरपराध्यति यदेनं स्थाणुम्-अन्धो न पश्यति। अतः पुरुषापराधः स भवति, पुरुष एवापराधी तत्र यदसावचक्षुष्मान्। एवमिहापि नैव मन्त्राणामपराधो यदशिक्षितेन भवता न विज्ञायन्ते। यथा- जानपदीषु प्रवृत्तिषु कौशलशिक्षाकृतः विद्यातः पुरुषाणां विशेषः। केचित्पुरुषा अविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्तुम्। केचिद्विस्पष्टार्थानपि न जानन्ति। तत्रैव सति वेदितृषु भूयोविद्यः प्रशस्यो भवति नेतरो मन्दबुद्धिरशिक्षितः।

**उपसंहारः**

निष्कर्षरूपेण वक्तुं शक्यते यत् मन्त्राः सार्थकाः। यज्ञिकन्यायमालायां

मन्त्रलक्षणाधिकरणप्रसङ्गे श्रूयते – मन्त्रस्य लक्षणं नास्ति विद्यते वा, न विद्यते।

याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम्॥[२७]

आचार्यकौत्सस्य शङ्कासमाधानं कृत्वा आचार्ययास्कः प्रस्तौति सिद्धान्तरूपेण।

तथैव दुर्गाचार्यः कथयति-

इति प्रभिन्नेषु परस्य हेतुषु स्वपक्षसिद्धावुदिते च कारणे।

अवस्थिता मन्त्रगणस्य सार्थता तदर्थमेतत्खलु शास्त्रमर्थवत्॥

पुनश्चजैमिनीना प्रोक्तम्–

मन्त्रा उरु प्रथस्वेति किमदृष्टैकहेतवः। यागेषूत पुरोडाशप्रथनादेश्च भासकाः॥

ब्राह्मणेनापि तद्धानान्मन्त्राः पुण्यैकहेतवः। न, तद्धानस्य दृष्टत्वाद् दृष्टं वरमदृष्टतः[२८]॥

इति॥

संदर्भाः

1 आप.यज्ञपरिभाषा सूत्र- १०

2 ऋग्वेदः - १/१६९/३

3 ऋग्वेदः - ५/४४

4 ऋग्वेदः - १०/१०६/६

5 निरुक्तम् – १/५

6 जैमिनीय मीमांसादर्शन मन्त्राधिकरण-१/२/३२

7 ऋग्वेदः -८/४४/१६

8 शुक्लयजुर्वेदमाध्यन्दिनशाखा- १/२२, तै.संहिता - १/१/८

9 जैमिनीय मीमांसादर्शन मन्त्राधिकरण-१/२/३१

10 मै.संहिता - ३/९/२, काथकसंहिता- २६/३

11 तै.संहिता - १/२/१/१

12 तै.संहिता - १/३/१३/१

13 जैमिनीय मीमांसादर्शन मन्त्राधिकरण-१/२/३५

14 तै.संहिता. -१/८/६/१, मै.संहिता – २/९/९

15 शुक्लयजुर्वेद माध्यन्दिनशाखा - १६/५४, तै.संहिता -४/५/११/१

16 ऋग्वेदः -१०/१३३/२

17 ऋग्वेदः -१०/१०३/१

18 तै.संहिता. -६/३/१/२

19 जैमिनीय मीमांसादर्शन मन्त्राधिकरण-१/२/३३

20 ऋग्वेदः – १/८९/१०

21 जैमिनीय मीमांसादर्शन मन्त्राधिकरण-१/२/३६

22 जैमिनीय मीमांसादर्शन मन्त्राधिकरण-१/२/३८

23 जैमिनीय न्यायमाला -२/१/८

24 निरुक्तम् – ७/२

25 पारस्करगृह्यसूत्र- १/३/१६

26 ऋग्वेदः - १/८९/१०

Scanned by CamScanner

27 याज्ञिकन्यायमाला - १/८

28 जैमिनीयन्यायमाला -१/२/४

संदर्भग्रन्थसूची --

१. ऋग्वेदसंहिता- श्रीमत्सायणाचार्यविरचितभाष्यसमेता, वैदिकसंशोधनमण्डल, पुने,१९०५

२. शुक्लयजुर्वेदसंहिता-उवट्ट-महीधरभाष्यसंवलित तत्वबोधिनि हिन्दीव्याख्योपेता, संकलकः पणशीकरो- पाह्वो वासुदेवशर्मा, चौखम्बा विद्याभवन, वाराणसी , १९९२

३. निरुक्तम् – छज्जुराम शास्त्री, मेहरचन्द्र लछमनदास पब्लिकेशन्स,नईदिल्ली,१९९३

४. तैत्तरीयसंहिता- सायणाचार्यविरचितभाष्यसमेता, वैदिकसंशोधनमण्डल, पुने

५. मैत्रायणिसंहिता - चौखम्बासुरभारती प्रकाशन, गोपालमन्दिरलेन, वाराणसी

६. जैमिनीयन्यायमाला – पट्टाभिरामशास्त्री, चौखम्भा संस्कृतसंस्थान, वाराणसी, संवत्-२०४७

७. पारस्करगृह्यसूत्रम्- हरिहर-गदाधरभाष्यद्वयोपेतम्, श्रीजगदीशचन्द्रमिश्र, चौखम्बासुरभारती प्रकाशन ।

Scanned by CamScanner